# "श्री रघूत्तम गुरु स्तोत्र संग्रह"

गंभीराशयगुंफसंभृतवच:संदर्भगर्भोल्लस–
ीकाभावविबोधनाय जगतां यस्यावतारोऽजनि ।
तत्तादृक्षदुरंतसंतततप:संतानसंतोषित–
श्रीकांतं सुगुणं रघूत्तमगुरुं वंदे परं देशिकं । १ ।

सच्चास्त्रामलभावबोधकिरणै: संवर्धयन् मध्वस–
त्सिद्धांताब्धिमनंतशिष्यकुमुदव्रातं विकासं नयन् ।
उद्भूतो रघुवर्यतीर्थजलधेस्तापत्रयं त्रासयन्
यस्तं नौमि रघूत्तमाख्यशशिनं श्रीविष्णुपादाश्रयं । २ ।

उद्यन्मार्तंडसंकाशं दंडमालाकमंडलून् ।
धरं कौपीनसूत्रं च सीताराघवमानसं । ३ ।

श्रीनिवासेन वंद्यांघ्रि तुलसीदामभूषणं ।
ध्यायेद्रघूत्तमगुरुं सर्वसौख्यप्रदं नृणां । ४ ।

रघूत्तमगुरुं नौमि शांत्यादिगुणमंडितं ।
रघूत्तमपदद्वंद्वकंजभृंगायितांतरं । ५ ।

रघूत्तमगुरुं वंदे रघूत्तमपदार्चकं ।
गांभीर्येणार्थबाहुल्यटीकातात्पर्यबोधकं । ६ ।

भावबोधकृतं नौमि भावभावितभावुकं ।
भावभाजं भावजादिपरीभावपरायणं । ७ ।

सन्न्यायविवृतेष्टीकाशेषसंपूर्तिकारिणं ।
टीकां दृष्ट्वापेटिकानां निचयं च चकार यः ।
प्रमेयमणिमालानां स्थापनाय महामतिः । ८ ।

यच्चिष्यशिष्यद्याष्टिप्पण्याचार्यसंज्ञिताः ।
तमलं भावबोधार्यं भूयो भूयो नमाम्यहं । ९ ।

शुकेन शांत्यादिषु वाङ्मयेषु व्यासेन धैर्येऽबुधिनोपमेयं ।
मनोजजित्यां मनसां हि पत्या रघूत्तमाख्यं स्वगुरुं नमामि । १० ।

राम राम तव पादपंकजं चिंतयामि भवबंधमुक्तये ।
वंदितं सुरनरेंद्रमौलिभिर्ध्यायते मनसि योगिभिः सदा । ११ ।

पिनाकिनीरसंजुष्टदेशे वासमनोरमं ।
पिनाकिपूज्यश्रीमध्वशास्त्रवर्धिनिशाकरान् । १२ ।

पंचकैर्भावबोधाख्यैर्ग्रंथैः पंचलसन्मुखैः ।
तत्त्वविज्ञापकैः स्वानामुपमेयं पिनाकिना । १३ ।

गांभीर्ये सर्वदुर्वादिगिरिपक्षविदारणे ।
विषयेषु विरागित्वे चोपमेयं पिनाकिना । १४ ।

धरणे भगवन्मूर्तेर्भरणे भक्तसंततेः ।
विना विना चोपमेयं मेयं तत्त्वप्रकाशने । १५ ।

गुरुत्वेऽखिललोकानां प्रदानेऽभीष्टसंततेः ।
शिष्येभ्यस्तत्त्वविज्ञानप्रदाने परमं गुरुं । १६ ।

सदाररामपादाब्जसदारतिसुधाकरं ।
सदा रिभेदने विष्णुगदारिसदृशं सदा । १७ ।

रघुनाथांघ्रिसद्भक्तौ रघुनाथानुजायितं ।
रघुनाथार्यपाण्युत्थरघुवर्यकरोदितं । १८ ।

वेदेशार्चितपादाब्जं वेदेशांघ्र्यब्जपूजकं ।
रघूत्तमगुरुं वंदे रघूत्तमपदार्चकं । १९ ।

रघूत्तमगुरुस्तोत्रस्याष्टकं यः पठेन्नरः ।
रघूत्तमप्रसादाच्च स सर्वाभीष्ठभाग्भवेत् । २० ।

यद्बृंदावनपूर्वतः फलवती धात्री जगत्पावनी ।
याम्यायां तु पिनाकिनी चलदलो मूर्तित्रयाधिष्टितः ।
वारुण्यां दिशि वामतः प्रतिकृतौ छाया कृता तिंत्रिणी
तद्बृंदावनमध्यगो गुरुवरो भूयात् स नः श्रेयसे । २१ ।

प्रणमत्कामधेनुं च भजत्सुरतरूपमं ।
श्री भावबोधकृत्पादचिंतामणिमुपास्महे । २२ ।

रघूत्तममुनींद्रा ये सर्वे शास्त्रविशारदाः ।
विद्यागुरून् कुलगुरून् नौमि तान् मे जगद्गुरून् । २३ ।

॥ इति श्री रघूत्तमगुरुस्तोत्रं ॥

Collection by Narahari Sumadhwa

for www.sumadhwaseva.com

(Source Dr.Prabhanjanacharya)